प्रयत्नेन कार्येषु सिद्धिर्जनानां, प्रयत्नेन सद्बुद्धिवृद्धिर्जनानाम्।
प्रयत्नेन युद्धे जयः स्याज्जनानां, प्रयत्नो विधेयः प्रयत्नो विधेयः॥1॥

प्रयत्नेन धीराः समुद्रं तरन्ति, प्रयत्नेन वीराः गिरीन् लङ्घयन्ति।
प्रयत्नेन विज्ञाः वियत्युत्पतन्ति, प्रयत्नो विधेयः प्रयत्नो विधेयः॥2॥

कठोरः प्रयत्नात् मृदुत्वं प्रयाति, प्रयत्नादसाध्यं भवत्येव साध्यम्।
प्रयत्नादयोग्याः सुयोग्याः भवन्ति, प्रयत्नो विधेयः प्रयत्नो विधेयः॥3॥

प्रयत्नेन मुक्तिं श्रिताः भारतीयाः, प्रयत्नेन ऋद्धिं गताः भारतीयाः।
प्रयत्नेन विश्वप्रियाः भारतीयाः, प्रयत्नो विधेयः प्रयत्नो विधेयः॥4॥

## शब्दार्थाः

| | | | |
|---|---|---|---|
| मज्जति | = डूबता है | परतन्त्रतापाशात् | = पराधीनता की जंजीरो से |
| उत्तुङ्गपर्वतेषु | = उँचे पर्वतों पर | स्यात् | = होती है |
| विधेयः | = करना चाहिए | धीराः | = धैर्यशाली लोग |
| विज्ञाः | = बुद्धिमान् लोग | वियति | = आकाश में |
| मृदुत्वम् | = कोमलता को | असाध्यम् | = कठिन |
| सिद्धिम् | = सम्पन्नता को | ऋद्धिम् | = वैभव को |
| सद्बुद्धिवृद्धिः | = अच्छी बुद्धि की वृद्धि | लङ्घयन्ति | = पार कर जाते हैं। |
| उत्पतन्ति | = उडते हैं | प्रयाति | = हो जाता है |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) जनानां सद्बुद्धिवृद्धिः केन भवति?

(ख) प्रयत्नेन वीराः कान् लङ्घयन्ति?

(ग) प्रयत्नेन के वियत्युत्पतन्ति?

(घ) प्रयत्नेन के विश्वप्रियाः?

(ङ) प्रयत्नादयोग्याः कीदृशाः भवन्ति?

**2. एकवाक्येन उत्तरं लिखत -**

(क) प्रयत्नेन भारतीयाः कां गताः?

(ख) प्रयत्नात् कः मृदुत्वं प्रयाति?

(ग) अस्माभिः कः विधेयः?

(घ) प्रयत्नेन कुत्र जनानां जयः स्यात्?

(ङ) प्रयत्नेन भारतीयाः कां श्रिताः?

3. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत–**

**उदाहरणं यथा–**

| | |
|---|---|
| प्रयत्नेन जनानां कार्येषु सिद्धिः भवति। | आम् |
| प्रयत्नादयोग्याः सुयोग्याः न भवन्ति। | न |
| (क) प्रयत्नेन भारतीयाः मुक्ताः न अभवन्। | |
| (ख) धीराः परिश्रमेण समुद्रं तरन्ति। | |
| (ग) वैज्ञानिकाः प्रयत्नेन आकाशे उड्डयन्ति। | |
| (घ) प्रयत्नेन वीराः गिरीन् न लङ्घयन्ति। | |
| (ङ) प्रयत्नेन असाध्यं साध्यं भवति। | |

4. **समुचितैः शब्दैः रिक्तस्थानानि पूरयत–**

(क) प्रयत्नेन ................. सिद्धिर्जनानाम्।

(ख) ................. धीराः समुद्रं तरन्ति।

(ग) प्रयत्नेन वीराः .................।

(घ) प्रयत्नेन ................. भारतीयाः।

(ङ) कठोरः ................. मृदुत्वं प्रयाति।

5. **उदाहरणानुसारम् अधोलिखितान् शब्दान् एकवचने परिवर्तयत–**

| यथा– | बहुवचनम् | एकवचनम् |
|---|---|---|
| | भारतीयाः | भारतीयः। |
| (क) | वीराः | |
| (ख) | धीराः | |
| (ग) | अयोग्याः | |
| (घ) | विश्वप्रियाः | |
| (ङ) | श्रिताः | |
| (च) | गिरीन् | |
| (छ) | कार्येषु | |

6. निम्नलिखितानां मूलशब्दं विभक्तिं वचनं च लिखत–

| | पदानि | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| **यथा–** | प्रयत्नेन | प्रयत्न | तृतीया | एकवचनम् |
| (क) | युद्धे | | | |
| (ख) | जनानाम् | | | |
| (ग) | प्रयत्नात् | | | |
| (घ) | जयः | | | |
| (ङ) | कठोरः | | | |
| (च) | विज्ञाः | | | |
| (छ) | गिरीन् | | | |

7. निम्नलिखितपदानां विलोमपदानि लिखत–

| | पदानि | | विलोमपदम् |
|---|---|---|---|
| यथा– | जयः | — | पराजयः। |
| (क) | कठोरः | | |
| (ख) | अयोग्याः | | |
| (ग) | सद्बुद्धिः | | |
| (घ) | धीराः | | |
| (ङ) | विज्ञाः | | |
| (च) | गताः | | |

8. निम्नलिखितपदानां समानार्थकपदानि लिखत–

| | पदानि | | समानार्थकपदम् |
|---|---|---|---|
| यथा– | जनानाम् | — | मनुष्याणाम्। |
| (क) | परिश्रमेण | — | |
| (ख) | मूर्खाः | — | |
| (ग) | पर्वतान् | — | |
| (घ) | युद्धे | — | |
| (ङ) | प्रयत्नः | — | |

9. **उदाहरणानुगुणम् अन्वयपूर्तिं कुरुत–**

प्रयत्नेन मुक्तिं श्रिताः भारतीयाः, प्रयत्नेन ऋद्धिं गताः भारतीयाः।
प्रयत्नेन विश्वप्रियाः भारतीयाः, प्रयत्नो विधेयः प्रयत्नो विधेयः॥

**अन्वयः–**

प्रयत्नेन भारतीयाः मुक्तिं श्रिताः, प्रयत्नेन भारतीयाः ऋद्धिं गताः, प्रयत्नेन भारतीयाः विश्वप्रियाः, प्रयत्नः विधेयः, प्रयत्नः विधेयः।

(क) प्रयत्नेन ............ समुद्रं ............., प्रयत्नेन वीराः ............... लङ्घयन्ति, ................. विज्ञाः वियति ..................., प्रयत्नः ...................., .................... विधेयः।

(ख) प्रयत्नेन जनानां ............... सिद्धिः, ..................... जनानां ............. वृद्धिः, प्रयत्नेन ............... युद्धे ................स्यात्, ...............विधेयः, प्रयत्नः ..............।

## योग्यताविस्तारः –

- **निम्नलिखितौ श्लोकौ कण्ठस्थं कुरुत–**

(क) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः,
दैवेन देयमिति कापुरुषाः वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या,
यत्ने कृते यदि न सिध्यति कोऽत्रदोषः॥1॥

(ख) उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥2॥

- **उदाहरणानुगुणम् अन्वयपूर्तिं कुरुत–**

प्रयत्नेन कार्येषु सिद्धिर्जनानां, प्रयत्नेन सद्बुद्धिवृद्धिर्जनानाम्।
प्रयत्नेन युद्धे जयः स्याज्जनानां, प्रयत्नो विधेयः प्रयत्नो विधेयः॥

*यत्ने कृते यदि न सिध्यति कोऽत्र दोषः।*